ISSN 2231-5063 Impact Factor : 4.6052 (UIF) Volume - 6 | Issue - 2 | August - 2016

GRT

Golden Research Thoughts

# विदुरनीतौ सत्य–अतिथिसत्कार–रूपे नैतिकाचार–विवेचनम्

डॉ. सुरेन्द्र पाल वत्स




## नैतिकाचार :

समाजस्य संगठनेन सह मानवसंस्कृतेः उदभवम् अभवत् । समाजं सुचारूपेण संचलनार्थं एकं प्रति यत्र एतादृशानां नियमानां रचना अभवत्, येषां उल्लंघने आततायिनं दण्डस्य व्यवस्थां अकरोत्। अपरं प्रति व्यक्तिरूपेण आयात्मिक व्यवहारिकश्च सद्व्यवहारः अर्थात् परस्परं कुर्वन्तं व्यवहारं सुगुण–दुर्गुणानां समीपे स्थापयित्वा तस्य मूल्यांकनकर्तुं किञ्चिद् एतादृशान् नियमान् अस्थापयत्, येन मानवस्य व्यक्तित्वं उदतिष्ठत् तथा अन्यं प्रति तान् न स्वीकुर्वन्तं समाजं हेयदृष्ट्या अपश्यत् । एते नियमाः नैतिक तत्वानि अकथयन् यान् स्वीकुर्वति अस्वीकुर्वति वा व्यक्तेः निजविवेकः कार्यं करोति ।

नैतिक शब्देनैव नैतिकतायाः निर्माणम् अभवत् । परस्परं सद्व्यवहारः अन्येषु शब्देषु नैतिकता एवास्ति। आंग्लभाषायाम् अस्य पुरतः Morality शब्दोऽस्ति।

नैतिकतायै 'Ethics' शब्दस्य प्रयोगः अभवत्। यस्य अर्थः Rules of Conduct Science that with moral's विश्वस्य (प्रत्येकस्मिन् धर्मे) प्रतिधर्मे संस्कृतौ च नैतिकाचार संहिता अभवत् । मुख्यरूपेण हिन्दू–नैतिक–संहिता तथा ईसाई–नैतिक–सहिता इत्यादयः सन्ति।

अस्माकं धर्मशास्त्रेषु अपि यमादीनां महाव्रतानां रूपे नैतिकतायाः एव उपदेशो दीयते। नैतिकतत्वं धर्मस्यैव एकम् अङ्.मस्ति ययोः मूलस्वरूपं सर्वदा सदृशम् अभवत् परन्तु तस्य बाह्यरूपे देश–कालानुसारं किञ्चित् परिवर्तनं भवति। काले काले[1] महापुरूषैः नैतिकोपदेशाः अदीयन्त ।

ईशावास्योपनिषदः प्रथम–मन्त्रे मनुष्याय नैतिकतायाः एव उपादिशत् ।

ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत् ।
तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम्।।[2]

मनु–बृहस्पति–शुक्राचार्य–भर्तृहरि–महात्माविदुर–चाणक्य–ईसादयः महात्मानः निज– युगानुसारं समाजानुसारं च नैतिकोपदेशान् प्रास्तुवन् । तैत्तिरीयोपनिषदः शिक्षावल्लयां अुयायस्य एकादश अनुवाके 'सत्यं वद, धर्मं चर'[3]इत्यादिषु वाक्येषु मनुष्यं नैतिकतां प्रति अग्रसर्तुमेव अकथत् ।

महाभारतयुगे महात्माविदुरः विदुरनीतौ येषां नैतिकमूल्यानां प्रतिपादनम् अकरोत् तेषु सत्यातिथिसत्कारयोः संक्षिप्तरूपेण अत्र विवेचनं क्रियते ।

## सत्यं

सत्यस्य अर्थः अस्ति–उचितं, यथार्थं, वास्तविकं, यस्मिन् कस्य प्रकारस्य दोषः न अस्तु तथा सत्यवचनं[4] सत्येन अभिप्रायः अस्ति यत् या वार्ता यस्मिन् रूपेऽस्ति, तां तस्मिनेवरूपे कथनं सत्यमस्ति, परन्तु अस्य विपरीतं या वार्ता यस्मिन् रूपेऽस्ति, तस्य कथनं तस्मिन् रूपे न कृत्वा अन्येन प्रकारेण तस्य कथनम् असत्यम् इति कथ्यते। सत्यासत्ययोः निर्णयं कठिनमस्ति। कस्यापि

[1] आ.श.को. – 410
[2] ई. उ. – 1
[3] तै. उ. – 11/1
[4] मानक हिन्दी कोश खण्ड – 5

वार्तायाः सत्यता एवं असत्यता प्रसङ्विशेषे निर्भरं करोति। एका वर्ता एकस्मिन् काले सत्यमस्ति तु द्वितीयक्षणे सा वार्ता प्रसङ्विशेषानुसारम् असत्यं भवति। कस्यापि प्राणरक्षार्थं, परोपकाराय वदनम् असत्यमपि सत्यमेव सिद्धयति तथा कस्य प्राणान् संकटे पातनं सत्यमपि असत्यं भवति। पश्यतु, वाल्मीकीय–रामायणे सत्यस्य महिमायाः कतिषु सुशब्देषु प्रतिपादितमस्ति –

सत्यमेवेश्वरो लोके सत्ये धर्मः सदाश्रितः।
सत्यमूलानि सर्वाणि सत्यान्नास्ति परं पदम् ।।

अथर्ववेदानुसारं प्राणाः सत्यवादिनं उत्तमलोके प्रतिष्ठितं करोति।[5] प्रश्नोपनिषदि असत्यस्य प्रभावस्य उल्लेखं कुर्वन् कथितं यत् यः नरः असत्यं वदति सः समूलोपरिशुष्यति।[6]मनुस्मृत्यानुसारं सत्यात्परो अन्यः कोऽपि धर्मः नास्ति अनृतात् च परम् किमपि पातकं नास्ति।[7] सत्यम् एकपदेन कथितं ब्रह्मास्ति, सत्यं एव धर्मः प्रतिष्ठितः अस्ति। अक्षयवेदापि सत्यस्य प्रतिपादनं कुर्वन्ति। सत्येन परमपदस्य प्राप्तिर्भवति।[8] शतपथब्राह्मणस्य अनुसारं सत्यमेव दृष्टिः अस्ति सत्यमेव च प्रजापतिरस्ति। बृहदारण्यकोपनिषदि धर्मं सत्यं च कथयन्तौ अकथयत्– सः यः धर्मः अस्ति तत्रैव सत्यम् अस्ति। अतः सत्यं वदनाय कथयन्ति यत् अस्य धर्मस्य उपदिशति धर्मस्य च कथनं करणाय कथयन्ति यत् अयं सत्यं भाषते, यतः द्वावेव एकैवास्ति।[9]

विदुरः कथयति यत् सत्येन धर्मं रक्षति, योगेन विद्या सुरक्षिता भवति, स्वच्छतया सुरूपं रक्षति, सदाचारेण च कुलं रक्षति।[10] मनुष्यः कदापि सत्यदानं, कर्मण्यता, अनसूया, क्षमा तथा धृतिः इत्यादीन् षड्गुणान् न परित्यजेत्।[11] असत्यं निर्णयं ददत् व्यक्तेः उल्लेखं कुर्वन् राज्ञे धृतराष्ट्राय असत्यं न वदनस्य उपदेशं यच्छन् विदुरः कथयति यत् मृषा निर्णयति, स नृपः नगरे अदृश्य बहिः द्वारे बुभुक्षायाः कष्टं सहमानः बहून् शत्रून् पश्यति।[12] पशवे मृषा वदनेन पञ्चजन्मपर्यन्तं, गवे मृषा वदने दशजन्मपर्यन्तं, अश्वाय असत्यं भाषणे शतं जन्मपर्यन्तं मनुष्याय च मृषावदने एकसहस्रं जन्मयावत् नरके पतति।[13] सुवर्णार्थं मृषावदनं भूतं–भावि–जन्मनि नरके पातयति। धास्त्रीभ्याम् मृषावदनं तु निजं सर्वनष्टमेव करोति, अतः त्वं आभ्यां कदापि मृषा न वदेः।[14]

विदुरः धृतराष्ट्रं स्वार्थवशः असत्यस्य आश्रयं न नीत्वा नष्टं रक्षार्थं कथयति – हे राजन्! भवान् धायै मृषा न वदतु, सुतस्य स्वार्थवशेन सत्यवार्तां न उक्त्वा पुत्र–मन्त्रिभिः सह विनाशस्य मुखे न गच्छतु।[15] स्वर्गप्राप्तौ सहायकाष्ट–गुणेषु विदुरः सत्यमपि एकः एतादृशः गुणः अमन्यत यस्य सत्पुरूषैः नित्यं सम्बद्धमस्ति। इन्द्रियनिग्रहः च सत्यं सरलता तथा कोमलता एतेषां चतुर्णां सज्जनाः अनुसरन्ति।[16]

पाण्डवान् सत्यवादिनः कथयन् विदुरः धृतराष्ट्रं तैः सह सन्धिं कुर्वतः परामर्शं यच्छन् कथयति – कुरूराज! भवान् पाण्डवैः सह सन्धिं करोतु येन शत्रवः छिद्रं अवलोकनस्य अवसरः न प्राप्स्यन्ति। समस्ताः पाण्डवः सत्ये तिष्ठन्ति, अद्युनाभवान् निजं पुत्रं दुर्योध्नं रूणद्धि।[17] स्वर्गप्राप्तौ सत्यवादितायाः

---

[5] प्राणोह सत्यवादिनमुत्तमे लोके आदध्त् । अथर्व. – 11/4/11
[6] समूलो वा एष परिशुष्यति योऽनृतमभिवदति। प्रश्नो. – 6/11
[7] नास्ति सत्यात्परो धर्मो नानृतात्पातकं परम् । मनु. – 8/7
[8] सत्यमेकपदं ब्रह्म सत्ये धर्मः प्रतिष्ठितः ।
सत्यमेवाक्षया वेदा सत्येननावाप्यते परम्। हरि. पु. 14/7
[9] यो वै स धर्मः सत्यं वैतत्... एत(येवैतदुभयं भवति। वृहद. – 1/4/14
[10] सत्येन रक्ष्यते धर्मो विद्या योगेन रक्ष्यते।
मृजया रक्ष्यते रूपं कुलं वृत्तेन रक्ष्यते ।। वि.नी. – अ. 2 श्लोक – 39
[11] षडेव तु गुणाः पुंसां न हातव्याः कदाचन।
सत्यं दानमनालस्यमनसूया क्षमा धृतिः ।। वि.नी. अ. – श्लोक 86
[12] नगरे प्रतिरू(ः सन् बहिद्वारे बुभुक्षितः ।
अमित्राान् भूयसः पश्येद् चः साक्ष्यमनृतं वदेत् ।। वि.नी. अ.–3 , श्लोक 31
[13] पंच पश्वनृते हन्ति दश हन्ति गवानृते ।
शतमश्वानृते हन्ति सहस्रं पुरूषानृते।। वि.नी. अ. – 3, श्लोक 33
[14] हन्ति जातान जायान् च हिरण्यार्थेऽनृतं वदन्।
सर्व भूम्यनृते हन्ति मा स्म भूम्यनृत वदेः ।। वि.नी. 3, श्लोक 39
[15] तस्माद् राजेन्द्र भूम्यर्थे नानृतं वक्तुमर्हसि।
मा गमः ससुतामात्यो नाशं पुत्राार्थमब्रुवन् ।। वि.नी. अ.– 3, श्लोक – 39
[16] यज्ञो दानमध्ययनं तपश्च चत्वार्येतान्मन्ववेतानि सद्भिः।
दमः सत्यं आर्जवम् आनृशंस्य चात्वार्येतान्यनुयान्ति सन्तः ।। वि.नी. अ. 3, श्लोक – 55
[17] संध्स्वं त्वं कौरव पाण्डुपुत्रौर्मा तेऽन्तरः रिपवः प्रार्थयन्तु ।
सत्ये स्थितास्ते नरदेव सर्वे दुर्योध्नं स्थापय त्वं नरेन्द्र ।। वि.नी. अ.–4, श्लोक–74

महत्त्वस्य उल्लेखं कुर्वन् तेन कथितं यत् अग्रजानां आज्ञाकारी, नीतिज्ञः, दाता, यज्ञ-शेषान्नस्य भोजनं भक्षणं, हिंसारहितः, अर्थकारी कार्यं दूरीभवनमं कृतज्ञः, सत्यवादी, कोमल-स्वभावं च विद्वान् सर्वगामी भवति।[18]

मनुष्य लोकस्य षड् सुखानि - राजन् । रोगहहितः, अनृण्यं, विप्रवासः, सद्भिर्मनुष्यैः सह वासः निजवृत्या जीविकाचालनं, अभीतवासः, एते षड् मनुष्यलोके सुखानि सन्ति।[19] उद्योगे, संलग्नः, तस्मात् न विरक्तं, ध्नलाभः कल्याणस्य च मूलमस्ति। अतः न उद्योगत्यागी मनुष्यः महान् भवति अतिसुखस्य च उपभोगं करोति।[20] सम्यक् अुययनं, न्यायोचितं युद्धं, पुण्यकर्मं सुष्ठुरूपेण कृतायाः तपस्यायाः अन्ते सुखस्य वृद्धिर्जायते।[21]

बाल्मिकी - रामायणे लक्ष्म्याः सुखस्य मूलकारणम् उद्योगमेव अकथ्यत्। अनिर्वेद - लक्ष्म्याः मूलकारणमस्ति। अनिर्वेदः एव परम्-सुखस्य साध्कः अस्ति। अनिर्वेदैव सर्वदा सर्वेषां अर्थानां सिद्धौ प्रवतकोऽस्ति। मनुष्यः यत् कर्म करोति तं अनिर्वेदः एव साफल्यं करोति।[22]

विदुरः ध्तराष्ट्रं कथयति ध्र्मः नित्यमस्ति, परन्तु सुखं दुःखं च अनित्यमस्ति, जीवं नित्यमस्ति परं अस्य कारणं अनित्यमस्ति। भवान् अनित्यं व्यक्त्वा नित्ये स्थितः भवतु सन्तोषं च धरयतु यतः सन्तोषैव परोलाभोऽस्ति।[23] सन्तोषः तु परं सुखमस्ति। अस्यातिरिक्तः विदुरः लौकिकसुखस्य प्रकाराणां एवं सुखसाध्नानामपि उल्लेखं अकरोत् यतः जगति सर्वे प्राणिनः सुखं इच्छन्ति। कः एतादृशः मनुष्यः अस्ति यः सुखं न इच्छति। परन्तु ज्ञानाभावे मनुष्यः एतादृशं कार्यं करोति यत् तस्मै दुःखदायी भवति। अतः विदुरः इच्छति यत् तस्य अग्रजः भ्राता सुखपूर्वकं जीवनं यापयतु। अतः सः तस्मै सुखदायिनीनां वार्तानां सम्बन्धे उपदेशं यच्छन् कथयति - । राजन्! ध्नस्य आयः, नित्यं रोग रहितः, स्त्रियः अनुकुलं एवं प्रियवादिनी, आज्ञाकारी पुत्रः तथा ध्नदात्री विद्यायाः ज्ञानम् एते अस्मिन् मनुष्यलोके सुख दायिनः भवन्ति।[24]

अन्यैःदुर्गुणैः सह असत्यं भाषिणः अध्मस्य पुरूषस्य सेवां न कुर्वतः प्रेरयन् विदुरः कथयति यत् कलहप्रदकर्म, कर्ता, अतिप्रमादी, सर्वदा असत्यं भाषणं, अस्थितरभक्तिः, स्नेहरहितः, निजं चतुरमन्य-एतेषां षड्प्रकाराणां अध्म - पुरूषाणां सेवां न कुर्यात्।[25] विदुरानुसारम् अक्रोध्ने क्रोधं जयतु, असाधुं सद्व्यवहारेण वशं करोतु, कृपणं दानेन जयतु, मृषां च सत्येन विजयताम्।[26]

## अतिथिसत्कारः

अतिथेः अर्थः वर्तते यत् यस्यागमनस्य कोऽपि तिथिर्नास्तु। अतिथिः सत्कारः भारतीय-संस्कृते एकं महत्वपूर्णम् अङ्गमस्ति। सर्वेषु धर्मिक-ग्रन्थेषु अतिथिसत्कारस्य महता प्रतिपादितास्ति। भारतीय संस्कृतेः इदं मूलभूतं सिद्धान्तमस्ति यत् यदि अरिः अपि अतिथेः रूपे गृहं आगच्छति तु सः पूजनीयः भवति यतः भारतीय-संस्कृतौ अतिथिः देववत्अमन्यत। यथा अतिथिं प्रति देवभावनां स्थापयतु।[27] अथर्ववेदे कथितमस्ति यत् यः नरः अतिथेः पूर्वमेव खादति, स निजगृहस्य श्रियं ज्ञानं च खादति।[28]

ये वेदविदः सन्ति ते एव अतिथयः सन्ति, अतः अतिथेः भोजनं गृहणात् पूर्वं भोजनं न कुर्यात्[29], शतपथ ब्राह्मणे अतिथिं प्रति अकथयत् भोजनगृहणात् पूर्वं स्वयं भक्षणं सर्वथा अनुचितमस्ति।[30]

---

[18] गहीतवाक्यो नयविद् वदान्यः शेषान्नभोक्ता ह्यपिंहिंसकश्च ।
नानर्थकृत्याकुलितः कृतज्ञः सत्यो मृदुः स्वर्गमुपैति विद्वान् ।। वि.नी. अ.5, श्लोक–15

[19] आरोग्यमानृण्यमविप्रासः सद्भिर्मनुष्यैः सद्भिर्मनुष्यैः सह सम्प्रयोगः ।
स्वप्रत्या वृतिरभीतवासः षड् जीवलोकस्य सुखानि राजन् ।। वि.नी.– 1/54

[20] अनिर्वेदः श्रियोमूलं लाभस्य च शुभस्य च ।
महान् भवत्यर्निष्णः चानन्त्यमश्नुते ।। वि.नी.–7/57

[21] स्वधीतस्य सुयु(स्य सुकृतस्य च कर्मणः ।
तपसश्च सुप्तप्तस्य तस्यान्ते सुखयेध्ते ।। वि.नी. – 4/54

[22] अनिर्वेदः श्रियो मूलमनिर्वेदः परम् सुखम् ।
अनिर्वेदो हि सततं सर्वार्थेषु प्रवर्तक : ।। वा.रा.सु.का – 12/10–11

[23] नित्योध्र्मः सुखदुःखे त्वनित्ये जीवो नित्यो हेतुरस्यत्वनित्यः ।
त्यक्तत्वानित्यं प्रतितिष्ठिस्व नित्ये संतुष्यत्वं तोषपरो हि लाभः ।। वि.नी. 8/12

[24] अर्थागमो नित्यमरोगिता च प्रिया च भार्या प्रियवादिनी च ।
वश्यश्च पुत्रोर्ऽथकरी च विद्याषड् जीवलोकस्य सुखानि राजन् ।। वि.नी. 1/87

[25] संक्लिष्ट कर्माणमति प्रमादं नित्यानृतं चादृढं भक्तिकं च ।
विसृष्टराग पटु मानिनं चाप्येतान् न सेवेत नराध्मान् षट ।। वि.नी. – 5/38

[26] अक्रोध्ने जयेत् क्रोध्मसाधुं साध्ुना जयेत् ।
जयेत् कदर्मं दानेन जयेत् सत्येन चानृतम् ।। वि.नी. – 7/72

[27] अतिथि देवो भव – तैत्तिरी. – 1/11

[28] श्रियं च वा एष संविदं च गृहाणामश्नाति यः पूर्वातिथेरश्नाति ।।

[29] एष वा अतिथिर्यच्छ्रोत्रियस्तस्मात्पूर्वो नाश्नीयात् । अथर्व. 9/6/3;7द्ध

Volume - 6 | Issue - 2 | August - 2016

बुद्धचरिते अतिथिसत्कारस्य विषये वर्णितमस्ति यत् अतिथिः कीदृशः अपि अस्तु, तस्य आतिथ्यं श्रेष्ठः धर्मोऽस्ति।[31] मनुस्मृतौ अतिथि-सत्कारस्य विषये कथितमस्ति यत् गृहमागतस्य अतिथेः यथाविधिं आदरं सत्कृत्य तस्मै यथाशक्तिं आसनं, जलं अन्नं च प्रददातु।[32]

यस्य गृहात् अतिथिः समुचितं सम्मानं प्राप्य गच्छति, सः परमधर्मिको भवति। आगमनस्य अतिथेः सत्कारात् अतिरिच्य तस्य कोऽपि अन्यः धर्मः नास्ति।[33] कठोपनिषदि अतिथि - सत्कारस्य वर्णयन् अकथत् यत् यस्मिने गृहे विप्रः अतिथिः बिना अन्न-पानं वसति, तस्य अल्प-बुद्धिव्यक्तेः आशां, प्रतीक्षां, संगतिं, मधुरावणीं, इच्छापूर्तिं पुत्रान् पशून् च सर्वान् नाशयति।[34]

विदुरानुसारं वैधः, चिकित्सकः शल्यकर्ता वा ब्रह्मचर्यभ्रष्टः, स्तेन, क्रूर, मद्यपाः, भ्रूणहा, सेनाजीवी, तथा श्रुतिविक्रेता एते यद्यपि पाद-प्रक्षालनीयाः न सन्ति तथापि यदि अतिथयः भूत्वा आगच्छन्ति तु आदरणीयाः भवन्ति।[35] हितोपदेशे निम्नवर्गस्य अतिथेः सत्कारस्य विषये कथितं यत् उत्तमस्य वर्णस्य व्यक्तेः गृहमागमनस्य निम्नवर्णस्य अतिथेऽपि समुचितं पूजयेत् यतः अतिथेः सर्वदेव-स्वरूपं भवति।[36] विदुरानुसारं अतिथिः सत्कारस्य विषये एवं कथितं यत् धीर-पुरूषः भवेत् (इच्छेत्) यदा कोऽपि साधुः पुरूषः अतिथेः रूपे गृहं आगच्छति तु पूर्ण आसनं दत्वा, जलमानीय पादौ प्रक्षालयतु पुनः तस्य कुशलं पृष्ट्वा निज-स्थितिं वदतु, तदनन्तरं आवश्यकता बुद्ध्वा अन्न-भोजनं कारयतु।[37] पञ्चतन्त्रे अतिथिं प्रति कथितं यत् यस्य गृहात् आदरं न प्राप्य दीर्घं निश्वासं त्यजन् अतिथिः निवर्तते, तस्य गृहात् पितृभिः सह देवापि विमुखं भूत्वा गच्छन्ति।[38]

---

30 तन्नवेवानवक्लृप्तम् यो मनुष्येष्वनश्नत्सु पूर्वो{श्नीयात् । शतप. – 1/1/1/8

31 आतिथ्यामर्याध्र्मो हि स्यादतिथिर्यथा तथा। बु( – 15/22

32 सम्प्राप्ताय त्वतिथये प्रदधा दासनोदके ।
अन्नं चैव यथाशक्ति सत्कृत्य विध्पिूर्वकम् ।। मनुं 3/99

33 अतिथिः पूजितो यस्य गृहस्थ स्य तु गच्छति।
नान्यत्तस्माचरो ध्र्मः सम्प्राप्ततिथि पूजनम् । महा. अनु – 2/70

34 आशाप्रतीक्षे सङ्.गतं सुनृतां चेष्टापूर्ते पुत्रापशूंश्च सर्वान् ।
एतद् वृङ्क्ते पुरूषस्यालपमेध्सो यस्यामनश्नन् वसति ब्राह्मणो गृहे ।। कठो. 1/1/8

35 चिकित्सकः शल्यकर्तावकीर्णी स्तेनः क्रूरो मद्यपो भ्रूणहाच ।
सेनाजीवी श्रुति विक्रायकश्च भृंश प्रियो{प्यतिथिर्नोद्कार्हः ।। वि.न. – 64

36 उत्तमस्यापि वर्णस्य नीचो{पि गृहमागतः ।
पूजनीयो यथायोग्य सर्वदेव मयो{तिथिः । हितो. – 64

37 पीठं दत्वा साध्वे{भ्यागताय आनीयापः परिनिर्णिज्य वाणैः ।
सुखं पृष्ट्वा प्रतिवेद्यात्म संस्था ततो दधदन्नमवेक्ष्य धेरः ।। वि.नी. – 6/2

38 अपूजितो{तिथिर्यस्य गृहद्याति विनिश्वसन् ।
गच्छन्ति विमुखास्तस्य पितृभिः सहदेवता ।। पच. – 5